परं ज्ञानं न च दीक्षापरं तपः । न च दीक्षापरं कालं तस्माद्दीक्षा गीरयसी”

तत्र देशकालादि तन्त्रसारे निर्णीतं यथा
“वृषे सिंहे च कन्यायां धनुर्मीनाख्यलग्नके । चन्द्रतारानुकूले च कुर्य्याद्दीक्षाप्रवर्त्तनम् । स्थिरलग्नं विष्णुमन्त्रे शिवमन्त्रे चरः शुभः । द्विःस्वभावगतं लग्नं शक्तिमन्त्रे प्रशस्यते । त्रिषडायगताः पापाः शुभाः केन्द्रा त्रिकोणगाः । दीक्षायान्तु शुभाः सर्वे रन्ध्रस्थाः सर्वनाशकाः” । शुक्लपक्षे भवेद्दीक्षा कृष्णेऽप्या पञ्चमाद्दिनात्” । निषिद्धमासेऽपि तत्तद्विशेषो मुनिभिरुदितः रत्नावल्याम् “षष्ठी भाद्रपदे मासि तथा कृष्णा चतुर्दशी । कार्त्तिके नवमी शुक्ला मार्गे शुक्ल तृतीयिका । पौषे च नवमी शुक्ला माघे शुक्लचतुर्थिका । फाल्गुने नवमी शुक्ला चैत्रे कामचतुर्दशी” । त्रयोदशीति केचित् । “वैशाखे साऽक्षया चैव ज्यैष्ठे दशहरा तिथिः । आषाढ़े नवमी शुक्ला श्रावणे कृष्णपञ्चमी । एतानि देवपर्वाणि तीर्थकोटिफलं लभेत् । अत्र दीक्षा प्रकर्त्तव्या न मासञ्च परीक्षयेत् । न वारं न च नक्षत्रं न तिथ्यादिकदूषणम् । न योगकरणञ्चैव शङ्करेण च भाषितम्” । अन्यच्च । “चैत्रे त्रयोदशी शुक्ला वैशाखैकादशी सिता । ज्यैष्ठे चतुर्दशी कृष्णा आषाढ़े नागपञ्चमी । श्रावणैकादशी भाद्रे रोहिणीसंयुताष्टमी । आश्विने च महापुण्या महाष्टम्यप्यभीष्टदा । कार्त्तिके नवमी शुक्ला मार्गशीर्षे तथा सिता । षष्ठी चतुर्दशी पौषे माघेऽप्येकादशी सिता । फाल्गुने च सिता षष्ठी चेति कालविनिर्णयः” । योगिनीतन्त्रे “अयने विषुवे चैव ग्रहणे चन्द्रसूर्य्ययोः । रविसंक्रान्तिदिवसे युगाद्यायां सुरेश्वरि ! । मन्वन्तरासु सर्वासु महापूजादिने तथा । चतुर्थी पञ्चमी चैव चतुर्दश्यष्टमी तथा । तिथयः शुभदाः प्रोक्ताः” इत्यादिवचनात् चतुर्दश्यष्टमीति शक्तिविषयम् चतुर्थीति गणेशविषयम् तत्तत्कल्पोक्तत्वात् “निन्दितेष्वपि कालेषु दीक्षोक्ता ग्रहणे शुभा । सूर्य्यग्रहणकालस्य समानो नास्ति भूतले । विशेषतो महादेवि ! दीक्षाग्रहणकर्म्मणि । तत्र यद्यत्कृतं सर्वमनन्तफलदं भवेत् । रविसंक्रमणे चैव सूर्य्यस्य ग्रहणे तथा । तत्र लग्नादिकं किञ्चिन्न विचार्य्यं कथञ्चन । रविसंक्रमणे चैव नान्यदन्वेषितं भवेत् । न वारतिथिमासादिशोधनं सूर्य्यपर्वणि” । एवं चन्द्रग्रहणेऽपि तथा च रुद्रयामले “न कुर्य्यात् कार्त्तिकीं दीक्षामुपरक्ते विभावसौ । न कुर्य्याद्वैष्णवीं तान्तु यदि चन्द्रमसो ग्रहः” । एतच्च गोपालश्रीविद्येतरविषयम् । “अन्येषु पुण्ययोगेषु ग्रहणे चन्द्रसूर्य्ययोरिति” गौतमीयात् । सूर्य्यग्रहणकाले तु नान्यदन्वेषितं भवेत्” इति योगिनीहृदयाच्च । वस्तुतस्तु “श्रीपराकालीशीजानि लोपादौ गंस्य यो मनुः । सूर्य्यस्योपग्रहे लब्धे नृणां शीघ्रफलप्रदः” उक्तवचनानुरोधात् पूर्ववचने शक्तिमन्त्रपदं श्रीविद्याद्यतिरिक्तशक्तिमन्त्रपरमिति साम्प्रदायिकाः । “अमावास्या सोमवारे भौमवारे चतुर्थिका । सप्तमी रविवारे च सूर्य्यग्रहशतैः समा । शिष्यानाहूय गुरुणा कृपया दीयते यदि । तदा लग्नादिकं किञ्चिन्न विचार्य्यं कथञ्चन । तथा “सर्वे वारा ग्रहाः सर्वे नक्षत्राणि च राशयः । यस्मिन्नहनि सन्तुष्टो गुरुः सर्वे शुभावहाः” । योगिनीतन्त्रे “ग्रहणे च महातीर्थे नास्ति कालस्य निर्णयः” । अथ वक्ष्यामि दीक्षायाः स्थानं तन्त्रानुसारतः । गोशालायां गुरोर्गेहे देवागारे च कानने । पुण्यक्षेत्रे तथोद्याने नदीतीरे च मन्त्रवित् । धात्रीविल्वसमीपे च पर्वताग्रगुहासु च । गङ्गायास्तु तटे वापि कोटिकोटिगुणं भवेत्” । दीक्षायां निषिद्धदेशमाह “गयायां भास्करक्षेत्रे विरजे चन्द्रपर्वते । चण्डाले च मतङ्गे च तथा कन्याश्रमेषु च । न कुर्वीयात्ततो दीक्षां तीर्थेष्वेतेषु पार्वति !” । वाराहीतन्त्रे “शुक्रोऽस्तो यदि वा वृद्धो गुर्वादित्यो भवेद्यदि । मेषवृश्चिकसिंहेषु तदा दोषो न विद्यते” । महाविद्यासु सर्वासु कालादिविचारो नास्ति तदुक्तं मुण्डमालातन्त्रे “कालादिशोधनं नास्ति न चामित्रादि दूषणम्” ।

५ कर्म्मणि च “विवाहदीक्षां निरवर्त्तयत् गुरुः” “विवाहदीक्षातिलकं चकार” रघुः नियमे “एताश्चान्याश्च सेवेत दीक्षा विप्रो वने वसन्” मनुः ।

**दीक्षागुरु** पु० दीक्षायां गुरुरुपदेष्टा । मन्त्राद्युपदेष्टरि ।

**दीक्षान्त** पु० दीक्षायाः प्रधानयागस्य अन्तः अन्तोपलक्षितः तत्समापको यागभेदः । अवभृथस्नानरूपे यागभेदे अमरः ।

**दीक्षापति** पु० ६त० । दीक्षापालके सोमे । “दीक्षां मे दीक्षापतिर्मन्यतामनु” यजु०५।६। “दीक्षायाः पतिः पालकः सोमः” वेददी० । दीक्षापालादयोऽप्यत्र ।

**दीक्षायूप** पु०न० दीक्षाङ्गं यूपः । दीक्षाङ्गपश्वादिमारणार्थे काष्ठमये पदार्थभेदे “रण्यज्ञदीक्षायूपेन” काद०